# ॥ वायुस्तुती ॥

.. vAyu stuti, praising hari
(trivikrAma paNDita) ..

sanskritdocuments.org

April 10, 2015

# Document Information

Text title : vAyu stuti
File name : vAyu_stuti.itx
Location : doc_vishhnu
Author : Trivikrama PaNDita
Language : Sanskrit
Subject : philosophy/hinduism/religion
Transliterated by : H. P. Raghunandan, Shrisha Rao shrao at dvaita.org
Proofread by : H. P. Raghunandan, Shrisha Rao shrao at dvaita.org
Latest update : April 9, 1996, November 1, 2010
Send corrections to : Sanskrit@cheerful.com
Site access : http://sanskritdocuments.org

# ॥ वायुस्तुती ॥

## ॥ वायुस्तुती ॥

॥ श्री हरिवायुस्तुतिः ॥

॥ अथ श्री नखस्तुतिः ॥

पान्त्वस्मान् पुरुहूतवैरि बलवन्मातङ्ग माद्यद्धटा ।
कुम्भोच्चाद्रि विपाटनाधिकपटु प्रत्येक वज्रायिताः ।
श्रीमत्कण्ठीरवास्य प्रतत सुनखरा दारितारातिदूर ।
प्रद्धस्तध्वान्त शान्त प्रवितत मनसा भाविताનાकिवृन्दैः ॥ १॥

लक्ष्मीकान्त समन्ततोऽपिकलयन् नैवेशितुस्ते समम् ।
पश्याम्युत्तम वस्तु दूरतरतोपास्तं रसोयोऽष्टमः ।
यद्रोशोत्कर दक्ष नेत्र कुटिल प्रान्तोत्थिताग्नि स्फुरत् ।
खद्योतोपम विस्फुलिङ्गभसिता ब्रह्मेशशक्रोत्कराः ॥ २॥

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितं
श्रीनृसिंहनखस्तुतिः सम्पुर्णम्
॥ अथ श्री हरिवायुस्तुतिः ॥

श्रीमद्विष्ण्वङ्घ्रि निष्ठा अतिगुणगुरुतम श्रीमदानन्दतीर्थ ।
त्रैलोक्याचार्य पादोज्वल जलजलसत् पांसवोऽस्मान्पुनन्तु ।
वाचांयत्रप्रणेत्रीत्रिभुवनमहिता शारदा शारदेन्दुः ।
ज्योत्स्नाभद्रस्मित श्रीधवळितककुभाप्रेमभारम्बभार ॥ १॥

उत्कण्ठाकुण्ठकोलाहलजवविदिताजस्रसेवानुवृद्ध ।
प्राज्ञात्मज्ञान धूतान्धतमससुमनो मौलिरत्नावळीनाम् ।
भक्त्युद्रेकावगाढ प्रघटनसघटात्कार सङ्घृष्यमाण ।
प्रान्तप्राग्र्याङ्घ्रि पीठोत्थित कनकरजः पिञ्जराञ्जिताशाः ॥ २॥

जन्माधिव्याध्युपाधिप्रतिहतिविरहप्रापकाणां गुणानाम् ।
अग्र्याणां अर्पकाणां चिरमुदितचिदानन्द सन्दोहदानाम् ।
एतेषामेशदोष प्रमुषितमनसां द्वेषिणां दूषकाणाम् ।

दैत्यानामार्थिमन्धे तमसि विदधतां संस्तवेनास्मि शक्तः ॥ ३॥

अस्याविष्कर्तुकामं कलिमलकलुषेऽस्मिन्जनेज्ञानमार्गम् ।
वन्द्यं चन्द्रेन्द्ररुद्र द्युमणिफणिवयोः नायकद्यैरिहाद्य ।
मध्वाख्यं मन्त्रसिद्धं किमुतकृतवतो मारुतस्यावतारम् ।
पातारं पारमेष्ठ्यं पदमपविपदः प्राप्तुरापन्न पुंसाम् ॥ ४॥

उद्यद्विद्युत्प्रचण्डां निजरुचि निकरव्याप्त लोकावकाशो ।
बिभ्रद्भीमो भुजेयोऽभ्युदित दिनकराभाङ्गदाढ्य प्रकाण्डे ।
वीर्योद्धार्यां गदाग्र्यामयमिह सुमतिंवायुदेवोविदध्यात् ।
अध्यात्मज्ञाननेता यतिवरमहितो भूमिभूषामर्णिमे ॥ ५॥

संसारोत्तापनित्योपशमद सदय स्नेहहासाम्बुपूर ।
प्रोद्यद्विद्यावनद्य द्युतिमणिकिरण श्रेणिसम्पूरिताशः ।
श्रीवत्साङ्काधि वासोचित तरसरलश्रीमदानन्दतीर्थ ।
क्षीराम्भोधिर्विभिन्द्याद्भवदनभिमतम्भूरिमेभूति हेतुः ॥ ६॥

मूध।न्यैषोऽन्जलिमे।र् दृढतरमिहते बध्यते बन्धपाश ।
क्षेत्रेधात्रे सुखानां भजति भुवि भविष्यद्विधात्रे द्युभत्रे।र् ।
अत्यन्तं सन्ततं त्वं प्रदिश पदयुगे हन्त सन्ताप भाजाम् ।
अस्माकं भक्तिमेकां भगवत उतते माधवस्याथ वायोः ॥ ७॥

साभ्रोष्णाभीशु शुभ्रप्रभमभयनभो भूरिभूभृद्विभूतिः ।
भ्राजिष्णुभू।र्भ्र।भूणां भवनमपि विभोऽभेदिबभ्रेबभूवे ।
येनभ्रोविभ्रमस्ते भ्रमयतुसुभृशं बभ्रुवद्दुर्भृताशान् ।
भ्रान्तिभे।र्दाव भासस्त्वितिभयमभि भोभू।क्ष्यतोमायिभिक्षून् ॥ ८॥

येऽमुम्भावम्भजन्ते सुरमुखसुजनाराधितं ते तृतीयम् ।
भासन्ते भासुरैस्ते सहचरचलितैश्चामरैश्चारुवेशाः ।
वैकुण्ठे कण्ठलग्न स्थिरशुचि विलसत्कान्ति तारुण्यलीला ।
लावण्या पूर्णकान्ता कुचभरसुलभाश्लेषसम्मोदसान्द्राः ॥ ९॥

आनन्दान्मन्दमन्दा ददति हि मरुतः कुन्दमन्दारनन्द्यावता।र् ।
ऽमोदान् दधानां मृदुपद मुदितोद्गीतकैः सुन्दरीणाम् ।
वृन्दैरावन्द्य मुक्तेन्द्वहिमगु मदनाहीन्द्र देवेन्द्रसेव्ये ।
मौकुन्दे मन्दरेऽस्मिन्नविरतमुदयन्मोदिनां देव देव ॥ १०॥

उत्तप्तात्युत्कटत्विट् प्रकटकटकट ध्वानसङ्घट्टनोद्यद् ।
विद्युद्व्यूढस्फुलिङ्ग प्रकर विकिरणोत्क्वाथिते बाधिताङ्गान् ।
उद्गाढम्पात्यमाना तमसि तत इतः किङ्करैः पङ्किलेते ।

पङ्क्ग्रिा।व्णाँ गरिम्णां ग्लपयति हि भवद्वेषिणो विद्वदाद्य ॥ ११॥

अस्मिन्नस्मद्गुरूणां हरिचरण चिरध्यान सन्मङ्गलानाम् ।
युष्माकं पाष्व।र्भूमिं धृतरणरणिकः स्वगि।सेंव्याम्प्रपन्नः ।
यस्तूदास्ते स आस्तेऽधिभवमसुलभ क्लेश निमू।र्कमस्त ।
प्रायानन्दं कथं चिन्नवसति सततं पञ्चकष्टेऽतिकष्टे ॥ १२॥

क्षुत् क्षामान् रूक्षरक्षो रदखरनखर क्षुण्णविक्षोभिताक्षान् ।
आमग्नानान्धकूपे क्षुरमुखमुखरैः पक्षिभिवि।क्षताङ्गान् ।
पूयासृन्मूत्र विष्ठा क्रिमिकुलकलिलेतत्क्षणक्षिप्त शक्त्याद्यस्त्र ।
व्रातार्दितान् स्त्वद्विष उपजिहते वज्रकल्पा जलूकाः ॥ १३॥

मातमे।र्मातरिश्वन् पितरतुलगुरो भ्रातरिष्टाप्तबन्धो ।
स्वामिन्सवा।न्तरात्मन्नजरजरयितः जन्ममृत्यामयानाम् ।
गोविन्दे देहिभक्तिं भवतिच भगवन्नूर्जितां निनि।र्मित्ताम् ।
निव्या।जाँ निश्चलां सद्गुणगण बृहतीं शाश्वतीमाशुदेव ॥ १४॥

विष्णोरत्त्युत्तमत्वादखिलगुणगणैस्तत्र भक्तिङ्गरिष्ठाम् ।
संश्लिष्टे श्रीधराभ्याममुमथ परिवारात्मना सेवकेषु ।
यः सन्धत्ते विरिञ्चि श्वसन विहगपानन्त रुद्रेन्द्र पूवे।र् ।
ष्वाध्यायंस्तारतम्यं स्फुटमवति सदा वायुरस्मद्गुरुस्तम् ॥ १५॥

तत्त्वज्ञान् मुक्तिभाजः सुखयिसि हि गुरो योग्यतातारतम्यात् ।
आधत्से मिश्रबुद्धिं स्त्रिदिवनिरयभूगोचरान्नित्यबद्धान् ।
तामिस्त्रान्धादिकाख्ये तमसिसुबहुलं दुःखयस्यन्यथाज्ञान् ।
विष्णोराज्ञाभिरित्थं श्रुति शतमितिहासादि चाकण।र्यामः ॥ १६॥

वन्देऽहं तं हनूमानिति महितमहापौरुषो बाहुशालि ।
ख्यातस्तेऽग्र्योऽवतारः सहित इह बहुब्रह्मचया।र्दि धर्मैः ।
सस्नेहानां सहस्वानहरहरहितं निर्दहन् देहभाजाम् ।
अंहोमोहापहो यः स्पृहयति महतीं भक्तिमद्यापि रामे ॥ १७॥

प्राक्पञ्चाशत्सहस्त्रैव्य।र्वहितमहितं योजनैः पर्वतं त्वम् ।
यावत्सञ्जीवनाद्यौषध निधिमधिकप्राणलङ्कामनैषिः ।
अद्राक्षीदुत्पतन्तं तत उत गिरिमुत्पाटयन्तं गृहीत्वा ।
यान्तं खे राघवाङ्घ्रौ प्रणतमपि तदैकक्षणे त्वांहिलोकः ॥ १८॥

क्षिप्तः पश्चात्सत्सलीलं शतमतुलमते योजनानां स ।
उच्चस्तावद्विस्तार वंश्च्यापि उपललवैव व्यग्रबुध्या त्वयातः ।
स्वस्वस्थानस्थिताति स्थिरशकल शिलाजाल संश्लेष नष्ट ।

छेदाङ्कः प्रागिवाभूत् कपिवरवपुषस्ते नमः कौशलाय ॥ १९॥

दृष्ट्वा दृष्टाधिपोरः स्फुटितकनक सद्वम।र् घृष्टास्थिकूटम् ।
निष्पिष्टं हाटकाद्रि प्रकट तट तटाकाति शङ्को जनोऽभूत् ।
येनाजौ रावणारिप्रियनटनपटुमु।ष्टिरिष्टं प्रदेष्टुम् ।
किंनेष्टे मे स तेऽष्टापदकट कतटित्कोटि भामृष्ट काष्ठः ॥ २०॥

देव्यादेश प्रणीति दृहिण हरवरावद्य रक्षो विघाता ।
ऽद्यासेवोद्यद्दयाद्र।र्ः सहभुजमकरोद्रामनामा मुकुन्दः ।
दुष्प्रापे पारमेष्ठ्ये करतलमतुलं मूधि।र्विन्यस्य धन्यम् ।
तन्वन्भूयः प्रभूत प्रणय विकसिताब्जेक्षणस्त्वेक्षमाणः ॥ २१॥

जघ्नेनिघ्नेनविघ्नो बहुलबलबकध्वंस नाद्येनशोचत् ।
विप्रानुक्रोश पाशैरसु विधृति सुखस्यैकचक्राजनानाम् ।
तस्मैतेदेव कुम।र्ः कुरुकुलपतये कम।र्णाचप्रणामान् ।
किमी।र्रं दुर्मतीनां प्रथमं अथ च यो नम।र्णा निम।र्माथ ॥ २२॥

निमृ।र्द्रन्नत्य यत्नं विजरवर जरासन्ध कायास्थिसन्धीन् ।
युद्धे त्वं स्वध्वरे वापशुमिवदमयन् विष्णु पक्षद्विडीशम् ।
यावत्प्रत्यक्ष भूतं निखिलमखभुजं तप।र्यामासिथासौ ।
तावत्यायोजि तृप्त्याकिमुवद भघवन् राजसूयाश्वमेधे ॥ २३॥

क्ष्वेलाक्षीणाट्टहासहं तवरणमरिहन्नुद्गदोद्दामबाहोः ।
बह्वक्षौहिण्य नीकक्षपण सुनिपुणं यस्य सर्वोत्तमस्य ।
शुश्रूशाथ।र्ं चकथ।र् स्वयमयमथ संवक्तुमानन्दतीथ।र् ।
श्रीमन्नामन्समथ।स्त्वमपि हि युवयोः पादपद्मं प्रपद्ये ॥ २४॥

दृह्यन्तींहृद्दहं मां दृतमनिल बलाद्रावयन्तीमविद्या ।
निद्रांविद्राव्य सद्यो रचनपटुमथापाद्यविद्यासमुद्र ।
वाग्देवी सा सुविद्या द्रविणद विदिता द्रौपदी रुद्रपत्न्यात् ।
उद्रिक्ताद्रागभद्रा द्रहयतु दयिता पूव।र्भीमाज्ञयाते ॥ २५॥

याभ्यां शुश्रूषुरासीः कुरुकुल जनने क्षत्रविप्रोदिताभ्याम् ।
ब्रह्मभ्यां बृंहिताभ्यां चितसुख वपुषा कृष्णनामास्पदाभ्याम् ।
निभे।र्दाभ्यां विशेषाद्विवचन विशयाभ्यामुभाभ्याममूभ्याम् ।
तुभ्यं च क्षेमदेभ्यः सरिसिजविलसल्लोचनेभ्यो नमोऽस्तु ॥ २६॥

गच्छन् सौगन्धिकाथ।र्ं पथि स हनुमतः पुच्छमच्छस्य ।
भीमः प्रोद्धतु।र्ं नाशकत्स त्वमुमुरुवपुषा भीषयामास चेति ।
पूर्णज्ञानौजसोस्ते गुरुतमवपुषोः श्रीमदानन्दतीथ।र् ।

क्रीडामात्रं तदेतत् प्रमदद सुधियां मोहक द्वेषभाजाम् ॥ २७॥

बह्वीः कोटीरटीकः कुटलकटुमतीनुत्कटाटोप कोपान् ।
द्राक्त्वं सत्वरत्वाच्चरणद गदया पोथयामासिथारीन् ।
उन्मथ्या तत्थ्य मिथ्यात्व वचन वचनान् उत्पथस्थांस्तथाऽयान् ।
प्रायच्छः स्वप्रियायै प्रियतम कुसुमं प्राण तस्मै नमस्ते ॥ २८॥

देहादुत्क्रामितानामधिपति रसतामक्रमाद्वक्रबुद्धिः ।
क्रुद्धः क्रोधैकवश्यः क्रिमिरिव मणिमान् दुष्कृती निष्क्रियाथ।र्म् ।
चक्रे भूचक्रमेत्य क्रकचमिव सतां चेतसः कष्टशास्त्रं ।
दुस्तक।र्ं चक्रपाणेगु।र्णगण विरहं जीवतां चाधिकृत्य ॥ २९॥

तद्वुत्प्रेक्षानुसारात्कतिपय कुनरैराद्दतोऽन्यैवि।र्सृष्टो ।
ब्रह्माहं निगु।र्णोऽहं वितथमिदमिति ह्येषपाशण्डवादः ।
तद्युक्त्याभास जाल प्रसर विषतरूद्दाहदक्षप्रमाण ।
ज्वालामालाधरोऽग्निः पवन विजयते तेऽवतारस्तृतीयः ॥ ३०॥

आक्रोशन्तोनिराशा भयभर विवशस्वाशयाच्छिन्नदपा।र्् ।
वाशन्तो देशनाशस्विति बत कुधियां नाशमाशादशाऽशु ।
धावन्तोऽश्लीलशीला वितथ शपथ शापा शिवाः शान्त शौया।र्ः ।
त्वद्व्याख्या सिंहनादे सपदि ददृशिरे मायि गोमायवस्ते ॥ ३१॥

त्रिष्वप्येवावतारेष्वरिभिरपघृणं हिंसितोनिवि।र्कारः ।
सव।र्ज्ञः सव।र्शक्तिः सकलगुणगणापूर्ण रूपप्रगल्भः ।
स्वच्छः स्वच्छन्द मृत्युः सुखयसि सुजनं देवकिं चित्रमत्र ।
त्राता यस्य त्रिधामा जगदुतवशगं किङ्कराः शङ्कराद्याः ॥ ३२॥

उद्यन्मन्दस्मित श्रीमृ।र्दु मधुमधुरालाप पीयूषधारा ।
पूरासेकोपशान्ता सुखसुजन मनोलोचना पीयमानं ।
सन्द्रक्ष्येसुन्दरं सन्दुहदिह महदानन्दं आनन्दतीथ।र्् ।
श्रीमद्वक्त्रेन्दु बिम्बं दुरतनुदुदितं नित्यदाहं कदानु ॥ ३३॥

प्राचीनाचीण।र्् पुण्योच्चय चतुरतराचारतश्चारुचित्तान् ।
अत्युच्चां रोचयन्तीं श्रुतिचित वचनांश्राव कांश्चोद्यचुञ्चून् ।
व्याख्यामुत्खात दुःखां चिरमुचित महाचाय।र्् चिन्तारतांस्ते ।
चित्रां सच्छास्त्रकता।र्श्चरण परिचरां छ्रावयास्मांश्चकिञ्चित् ॥ ३४॥

पीठेरत्नोकपक्लृप्ते रुचिररुचिमणि ज्योतिषा सन्निषण्णम् ।
ब्रह्माणं भाविनं त्वां ज्वलति निजपदे वैदिकाद्या हि विद्याः ।
सेवन्ते मूति।र्मत्यः सुचरितचरितं भाति गन्धव।र्् गीतं ।

प्रत्येकं देवसंसत्स्वपि तव भघवन्नर्तितद्योवधूषु ॥ ३५॥

सानुक्रोषैरजस्रं जनिमृति निरयाद्यूमि।र्मालाविलेऽस्मिन् ।
संसाराब्धौनिमग्नांशरणमशरणानिच्छतो वीक्ष्यजन्तून् ।
युष्माभिः प्राथितः सन् जलनिधिशयनः सत्यवत्यां महषे।र्ः ।
व्यक्तश्चिन्मात्र मूति।र्नखलु भगवतः प्राकृतो जातु देहः ॥ ३६॥

अस्तव्यस्तं समस्तश्रुति गतमधमैः रत्नपूगं यथान्धैः ।
अथ।र्ं लोकोपकृत्यैः गुणगणनिलयः सूत्रयामास कृत्स्नम् ।
योऽसौ व्यासाभिधानस्तमहमहरहः भक्तितस्त्वत्प्रसादात् ।
सद्यो विद्योपलब्ध्यै गुरुतममगुरुं देवदेवं नमामि ॥ ३७॥

आज्ञामन्यैरधाया।र्ं शिरसि परिसरद्रश्मि कोटीरकोटौ ।
कृष्णस्याक्लिष्ट कर्मादधदनु सराणादर्थितो देवसङ्घैः ।
भूमावागत्य भूमन्नसुकरमकरोब्र।ह्मसूत्रस्य भाष्यम् ।
दुभा।ष्यं व्यास्यदस्योम।र्णिमत उदितं वेदसद्युक्तिभिस्त्वम् ॥ ३८॥

भूत्वाक्षेत्रे विशुद्धे द्विजगणनिलये रौप्यपीठाभिधाने ।
तत्रापि ब्रह्मजातिस्त्रिभुवन विशदे मध्यगेहाख्य गेहे ।
पारिव्राज्याधि राजः पुनरपि बदरीं प्राप्य कृष्णं च नत्वा ।
कृत्वा भाष्याणि सम्यक् व्यतनुत च भवान् भरताथ।र्प्रकाशम् ॥ ३९॥

वन्दे तं त्वां सुपूर्ण प्रमतिमनुदिना सेवितं देववृन्दैः ।
वन्दे वन्दारुमीशे श्रिय उत नियतं श्रीमदानन्दतीथ।र्म् ।
वन्दे मन्दाकिनी सत्सरिदमल जलासेक साधिक्य सङ्गम् ।
वन्देऽहं देव भक्त्या भव भय दहनं सज्जनान्मोदयन्तम् ॥ ४०॥

सुब्रह्मण्याख्य सूरेः सुत इति सुभृशं केशवानन्दतीथ।र् ।
श्रीमत्पादाब्ज भक्तः स्तुतिमकृत हरेवा।र्युदेवस्य चास्य ।
त्वत्पादाचा।र्देण ग्रथित पदल सन्मालया त्वेतयाये ।
संराध्यामूनमन्ति प्रततमतिगुणा मुक्तिमेते व्रजन्ति ॥ ४१॥

इति श्री त्रिविक्रमपण्डिताचाय।र् विरचितं
श्री हरिवायुस्तुतिः सम्पूर्णम्

॥ अथ श्री नखस्तुतिः ॥

पान्त्वस्मान् पुरुहूतवैरि बलवन्मातङ्ग माद्यद्घटा ।
कुम्भोच्चाद्रि विपाटनाधिकपटु प्रत्येक वज्रायिताः ।
श्रीमत्कण्ठीरवास्य प्रतत सुनखरा दारितारातिदूर ।
प्रद्ध्वस्तध्वान्त शान्त प्रवितत मनसा भाविताناकिवृन्दैः ॥ १॥

लक्ष्मीकान्त समन्ततोऽपिकलयन् नैवेशितुस्ते समम् ।
पश्याम्युत्तम वस्तु दूरतरतोपास्तं रसोयोऽष्टमः ।
यद्रोशोत्कर दक्ष नेत्र कुटिलः प्रान्तोत्थिताग्नि स्फुरत् ।
खद्योतोपम विस्फुलिङ्गभसिता ब्रह्मेशशक्रोत्कराः ॥ २॥

इति श्रीमदानन्दतीथ।भगवत्पादाचाय।विरचितं
श्रीनृसिंहनखस्तुतिः सम्पुर्णम्
॥ भारतीरमणमुख्यप्राणान्तर्गत श्रीकृष्णाप।र्णमस्तु ॥

वायुभी।र्मो भीमनादो महूजाः सवे।र्शां च प्राणिनां प्राणभूतः ।
अनावृत्तिदे।र्हिनां देहपाते तस्माद्वायुदे।र्वदेवो विशिष्टः ॥ ॥

ज्ञाने विरागे हरिभक्तिभावे धृतिस्थितिप्राणबलेषि योगे ।
बुद्धौ च नान्यो हनुमत्समानः पुमान् कदाचित् क्वचकश्च नैव ॥ ॥

वातेन कुन्त्यां बलवान् स जातः शूरस्तपस्वी द्विषतां निहन्ता ।
सत्ये च धर्मे च रतः सदैव पराक्रमे शत्रुभिरप्रधृष्यः ॥ ॥

यो विप्रलम्भविपरीतमतिप्रभूतान् वादान्निरस्त कृतवान्भुवि तत्त्ववादम् ।
सवे।श्वरो हरिरिति प्रतिपादयन्तमानन्दतीथ।र् मुनिवय।र्महं नमामि ॥ ॥

यस्य त्रीण्युदितानि वेदवचने रूपाणि दिव्यान्यलम् ।
बट् तद्दर्शनमित्थमेव निहितं देवस्य भगो।र् महत् ।
वायो रामवचोनयं प्रथमकं पृक्षो द्वितीयं वपुः ।
मध्वो यत्तु तृतीयमेतदमुना ग्रन्थः कृतः केशवे ॥ ॥

महाव्याकरणाम्भोधि मन्थमानसमन्दरम् ।
कवयन्तं रामकीत्या।र् हनूमन्तमुपास्महे ॥ ॥

ब्रह्मान्ता गुरवः साक्षादिष्टं दैवं श्रियः पतिः ।
आचार्याः श्रीमदाचार्याः सन्तु मे जन्म जन्मनि ॥ ॥

प्रथमो हनुमान्नामा द्वितीयो भीम एव च ।
पूर्णप्रज्ञ तृतीयस्तु भगवत्काय।र्साधकः ॥ ॥

मुख्यप्राणाय भीमाय नमो यस्य भुजान्तरम्
नाना वीरसुवणा।र्नां निकषाश्मायितं बभौ ॥ ॥

स्वान्तस्थानन्तशैयाय पूर्णज्ञानरसाण।र्से ।
उत्तुङ्गवाक्तरङ्गाय मध्वदुग्धाब्धये नमः ॥ ॥

येनाहं इह दुर्मार्गात् उद्धृत्यादि निवेशितः ।

सम्यक् श्रीवैष्णवे मार्गे पूर्णप्रज्ञं नमामि तम् ॥ ॥

हनूमानञ्जनी सूनुः वायुपुत्रो महाबलः ।
रामेष्टः फल्गुणसखः पिङ्गाक्षोऽमितविक्रमः ॥ ॥

उदधिक्रमणश्चैव सीतासन्देशहारकः ।
लक्ष्मणप्राणदाता च दशग्रीवस्य दर्पहा ॥ ॥

मारुतिः पाण्डवो भीमो गदापाणिवृ।कोदरः ।
कौन्तेयः कृष्णदूतश्च भीमसेनो महाबलः ॥ ॥

जरासन्धान्तको वीरो दुःशासन विनाशनः ।
पूर्णप्रज्ञो ज्ञानदाता मध्वो ध्वस्त दुरागमः ॥ ॥

तत्त्वज्ञो वैष्णवाचार्यो व्यासशिष्यो यतीश्वरः ॥ ॥

शुभतीर्थाभिधानश्च जितामित्रो जितेन्द्रियः ।
श्रीमदानन्द सन्नाम्नामेव द्वादशकं जपेत् ।
लभते वैष्णवीं भक्तिं गुरुभक्ति समन्वितम् ॥ ॥

मनोजवं मारुततुल्यवेगं जितेन्द्रियं बुद्धिमतां वरिष्ठम् ।
वातात्मजं वानरयूथमुख्यं श्रीरामदूतं शिरसा नमामि ॥ ॥

बुद्धिर्बलं यशो धैय।र्ं निभ।र्यत्त्वं अरोगता ।
अजाड्यं वाक्पटुत्त्वं च हनूमत्स्मरणाद्भवेत् ॥ ॥

न माधवसमो देवो न च मध्व समो गुरुः ।
न तद्वाक्यसमं शास्त्रं न च तस्य समः पुमान् ॥ ॥

भीमसेन समो नास्ति सेनयोरुभयोरपि ।
पाण्डित्येच पटुत्वे च शूरत्वे च बलेपि च ॥ ॥

आचार्यः पवनोऽस्माकं आचार्याणी च भारती ।
देवो नारायणः श्रीशः देवी मङ्गळ देवता ॥ ॥

Encoded and proofread by H. P. Raghunandan, Shrisha Rao
shrao at dvaita.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

---

.. vAyu stuti, praising hari (trivikrAma paNDita) ..
was typeset on April 10, 2015

Please send corrections to *sanskrit@cheerful.com*